# Shri Renuka Sahasranama Stotram

# શ્રીરેણુકાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : reNukAsahasranAmastotra padmapurANe reNukAtantre cha

File name : reNukAsahasranAmastotra.itx

Category : sahasranAma, devii, reNukA, stotra, devI

Location : doc_devii

Transliterated by : Singanallur Ganesan

Proofread by : Singanallur Ganesan

Description-comments : from shrIreNukAtantram, Pitambarapeeth, Datia. See Corresponding Namavali.

Latest update : May 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 13, 2022

*sanskritdocuments.org*

# શ્રીરેણુકાસહસ્રનામસ્તોત્રમ્

અથ શ્રીરેણુકાતન્ત્રાન્તર્ગતં શ્રીરેણુકાસહસ્રનામસ્તોત્રમ્ ।
શ્રી ગણેશાય નમઃ । શ્રી રેણુકાયૈ નમઃ ।
ગિરિપૃષ્ઠે સમાસીનં શઙ્કરં લોકશઙ્કરમ્ ।
પ્રણતઃ પરિપપ્રચ્છ સંશયસ્થઃ ષડાનનઃ ॥ ૧॥

સ્કન્દ ઉવાચ –
તાત સર્વેશ્વરસ્ત્વં હિ સર્વજ્ઞઃ સર્વભાવનઃ ।
કથયસ્વ પ્રસાદેન રહસ્યં સકલાર્થદમ્ ॥ ૨॥

વિજયઃ સઙ્કટે ઘોરે નિર્વિઘ્નં બલમુત્કટમ્ ।
અન્યેઽપિ વાઞ્છિતાર્થાશ્ચ સિદ્ધ્યન્ત્યાશુ વિના શ્રમમ્ ॥ ૩॥

શઙ્કર ઉવાચ –
સાધુ પૃષ્ટં મહાબાહો સંશયો માસ્તુ માસ્તુ તે ।
યદનુષ્ઠાનમાત્રેણ સર્વાન્કામાનવાપ્સ્યસિ ॥ ૪॥

કસ્યચિન્નયદાખ્યાતં તદ્રહસ્યં વદામ્યહમ્ ।
સ્તોત્રં સહસ્રનામાખ્યં રેણુકાયાસ્તુ સિદ્ધિદમ્ ॥ ૫॥

સદ્યઃ પ્રત્યયકામસ્ત્વં શ‍ૃણુ ષણ્મુખ ભક્તિતઃ ।
સર્વદેવાશ્ચ વેદાશ્ચક્ષીણવીર્યા યુગે યુગે ॥ ૬॥

અક્ષીણફલદાત્રીયં ત્રિસત્યં મમ ભાષિતમ્ ।
સર્વદેવમયી દેવી રેણુકા કામદાર્ચિતા ॥ ૭॥

પુરદાહે મયા ધ્યાતા તથૈવ ગરલાશને ।
વિષ્ણુના સાગરોન્માથે બ્રહ્મણા સૃષ્ટિકર્મણિ ॥ ૮॥

ગોત્રભેદે મઘવતા જગતી ધારણેઽહિના ।
કામેન શમ્બરવધે રત્યા તત્પ્રાપ્તયે પુનઃ ॥ ૯॥

ગણાધીશેન સતતં વિઘ્નવારણકર્મણિ ।
કિં વત્સ બહુનોક્તેન હૈમવત્યા મદાખ્યયા ॥ ૧૦॥

ધ્યાત્વા સર્વાર્થદા સા હિ સર્વલોકૈકસંશ્રયા ।
મહત્કાર્યોદ્યતૈરન્યૈર્બહુભિશ્ચિન્તિતા શિવા ॥ ૧૧॥

ધર્માર્થકામમોક્ષાર્થમવાઙ્મનસગોચરા ।
તસ્યા એવ પ્રસાદાત્તાં સ્તૌમિ નામાવલિચ્છલાત્ ॥ ૧૨॥

ઋષ્યાદિકં ચ સઙ્ક્ષેપાત્કથયામિ ષડાનન ।
ત્ર્યમ્બકશ્ચ ઋષિઃ પ્રોક્તોઽનુષ્ટુપ્છન્દઃ પ્રકીર્તિતમ્ ॥ ૧૩॥

એકવીરા મહામાયા રેણુકા દૈવતં સ્મૃતમ્ ।
સર્વપાપક્ષયદ્વારા પ્રીત્યૈ દેવ્યા મુહુર્મુહુઃ ॥ ૧૪॥

સર્વાભીષ્ટફલપ્રાપ્તૌ વિનિયોગ ઉદાહૃતઃ ।
રેણુકા રામમાતેતિ મહાપુરનિવાસિની ॥ ૧૫॥

એકવીરા કાલરાત્રિરેકલા નામભિઃ ક્રમાત્
અઙ્ગુષ્ઠાદિ કરન્યાસો હૃદયાદિ ષડઙ્ગકમ્ ।
ચતુર્થ્યન્તૈર્નમોન્તૈશ્ચ પ્રણવાદિભિરાચરેત્ ॥ ૧૬॥

અસ્ય શ્રી રેણુકા સહસ્રનામસ્તોત્રમન્ત્રસ્ય ત્ર્યમ્બક ઋષિઃ
શ્રીરેણુકા દેવતા । અનુષ્ટુપ્છન્દઃ । સર્વપાપક્ષયદ્વારા
શ્રી જગદમ્બા રેણુકા પ્રીત્યર્થં સર્વાભીષ્ટફલપ્રાપ્ત્યર્થં
ચ જપે વિનિયોગઃ ।
અથ ન્યાસઃ - શ્રીરેણુકાયૈ નમઃ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ રામમાત્રે નમઃ તર્જનીભ્યાં નમઃ ।
ૐ મહાપુરવાસિન્યૈ નમઃ મધ્યમાભ્યાં નમઃ ।
ૐ એકવીરાયૈ નમઃ અનામિકાભ્યાં નમઃ ।
ૐ કાલરાત્ર્યૈ નમઃ કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ એકલાયૈ નમઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિ- ૐ રેણુકાયૈ નમઃ હૃદયાય નમઃ ।
ૐ રામમાત્રે નમઃ શિરસે સ્વાહા ।
ૐ મહાપુરવાસિન્યૈ નમઃ શિખાયૈ વષટ્ ।
ૐ એકવીરાયૈ નમઃ કવચાય હું ।
ૐ કાલરાત્ર્યૈ નમઃ નેત્રત્રયાય વૌષટ્ ।

ૐ એકલાયૈ નમઃ અસ્ત્રાય ફટ્ ।

ધ્યાનમ્ –

ધ્યાયેન્નિત્યમપૂર્વવેષલલિતાં કન્દર્પલાવણ્યદાં
દેવીં દેવગણૈરુપાસ્યચરણાં કારુણ્યરત્નાકરામ્ ।
લીલાવિગ્રહિણીં વિરાજિતભુજાં સચ્ચન્દ્રહાસાદિભિ-
ર્ભક્તાનન્દવિધાયિનીં પ્રમુદિતાં નિત્યોત્સવાં રેણુકામ્ ॥ ૧૭॥

અથ શ્રીરેણુકાસહસ્રનામસ્તોત્રમ્ ।

ૐ રેણુકા રામજનની જમદગ્નિપ્રિયા સતી ।
એકવીરા મહામાયા કાલરાત્રિઃ શિવાત્મિકા ॥ ૧૮॥

મહામોહા મહાદીપ્તિઃ સિદ્ધવિદ્યા સરસ્વતી ।
યોગિની ચન્દ્રિકાસિદ્ધા સિદ્ધલક્ષ્મીઃ શિવપ્રિયા ॥ ૧૯॥

કામદા કામજનની માતૃકા મન્ત્રસિદ્ધિદા ।
મન્ત્રસિદ્ધિર્મહાલક્ષ્મી માતૃમણ્ડલવલ્લભા ॥ ૨૦॥

ચન્દ્રિકા ચન્દ્રકાન્તિશ્ચ સૂર્યકાન્તિઃ શુચિસ્મિતા ।
યોગેશ્વરી યોગનિદ્રા યોગદાત્રી પ્રભાવતી ॥ ૨૧॥

અનાદ્યન્તસ્વરૂપા શ્રીઃ ક્રોધરૂપા મહાગતિઃ ।
મનઃશ્રુતિસ્મૃતિર્ઘ્રાણચક્ષુસ્ત્વગ્રસના રસા ॥ ૨૨॥

માતૃકા પતિરુત્ક્રોશા ચણ્ડહાસા મહાવરા ।
મહાવીરા મહાશૂરા મહાચાપા રથસ્થિતા ॥ ૨૩॥

બર્હિપત્રપ્રિયા તન્વી બર્હિપત્રા ચતુર્ભુજા ।
નાદપ્રિયા નાદલુબ્ધા ત્ર્યક્ષરા મૃતજીવની ॥ ૨૪॥

અમૃતામૃતપાનેષ્ટા સિન્ધુપા પાત્રશાલિની ।
ચણ્ડહાસધરા શૂરા વીરા ડમરુમાલિની ॥ ૨૫॥

શિરોધરા પાત્રકરા વરદા વરવર્ણિની ।
ત્રિમૂર્તિર્વેદજનની વેદવિદ્યા તપોનિધિઃ ॥ ૨૬॥

તપોયુક્તા તપોલક્ષ્મીસ્તપસઃ સિદ્ધિદાપરા ।
લલિતા સાત્વિકી શાન્તા રાજસી રક્તદન્તિકા ॥ ૨૭॥

એકલા રેણુતનયા કામાક્ષી સત્પરાયણા ।

ઐન્દ્રી માહેશ્વરી બ્રાહ્મી વૈષ્ણવી વડવાનલા ॥ ૨૮॥

કૌબેરી ધનદા યામ્યા યામ્યાગ્નેયી તનુર્નિશા । (ધનદા યામ્યાગ્નેયી વાયુતનુર્નિશા)
ઈશાની નૈરૃતિઃ સૌમ્યા માહેન્દ્રી વારુણી સમા ॥ ૨૯॥

સર્વર્ષિધ્યેયચરણા વારણા નરવલ્લભા ।
ભિલ્લીવેષધરા ભિલ્લી બર્બરાલકમણ્ડિતા ॥ ૩૦॥

શઋ઼ગીવાદનસુરસા ગુઞ્જાહારવિભૂષણા ।
મયૂરપિચ્છાભરણા શ્યામા નીલામ્બરા શિવા ॥ ૩૧॥

કાલિકા રેણુદુહિતા શિવપૂજ્યા પ્રિયંવદા ।
સૃષ્ટિકૃત્ સ્થિતિકૃત્ક્રુદ્ધા પૃથ્વી નારદસેવિતા ॥ ૩૨॥

સંહારકારિણીન્દ્રાક્ષી રક્ષોઘ્ની ચન્દ્રશેખરા ।
હું ફટ્ વૌષટ્ વષડ્રૂપા સ્વધા સ્વાહા નમો મનુઃ ॥ ૩૩॥

સુષુપ્તિર્જાગ્રતિર્નિદ્રા સ્વપ્ના તુર્યા ચ ચક્રિણી ।
તારા મન્દોદરી સીતાઽહલ્યાઽરુન્ધતિકાદિતિઃ ॥ ૩૪॥

ભગીરથી ચ કાવેરી ગૌતમી નર્મદા મહી ।
સરયૂર્ગૌતમી ભીમા ત્રિવેણી ગણ્ડકી સરી ॥ ૩૫॥

માનસં ચન્દ્રભાગા ચ રેવા ગઙ્ગા ચ વેદિકા ।
હરિદ્વારં માતૃપુરં દત્તાત્રેયનિવાસભૂઃ ॥ ૩૬॥

માતૃસ્થાદિસંસ્થાના માતૃમણ્ડલમણ્ડિતા ।
માતૃમણ્ડલસમ્પૂજ્યા માતૃમણ્ડલમધ્યગા ॥ ૩૭॥

નાનાસ્થાનાવતારાદ્યા નાનાસ્થાનચરિત્રકૃત્ ।
કમલા તુલજાઽઽત્રેયી કોહ્લાપુરનિવાસિની ॥ ૩૮॥

મન્દાકિની ભોગવતી દત્તાત્રેયાનુસૂયકા ।
ષટ્ચક્રદેવતા પિઙ્ગા જમદગ્નીશ્વરાર્દ્ધહૃત્ ॥ ૩૯॥

ઇડાખ્યા ચ સુષુમ્નાખ્યા ચન્દ્રસૂર્યગતિર્વિયત્ ।
ચન્દ્રસૂર્યસમાખ્યાતા સર્વસ્ત્રીનિલયાધ્વનિઃ ॥ ૪૦॥

સમસ્તવિદ્યાતત્ત્વજ્ઞા સર્વરૂપા સુખાશ્રયા ।
પુણ્યપાપેશ્વરી કીર્તિર્ભોક્ત્રી ભોગપ્રવર્તિની ॥ ૪૧॥

જમદગ્ન્યસ્ય જનની કવિશક્તિઃ કવિત્વદા ।
હ્રીઙ્કારામ્બા તમોરૂપા ક્લીઙ્કારા કામદાયિની ॥ ૪૨॥

વાક્પ્રદૈઙ્કારરૂપા ચ મુક્તિદૌઙ્કારરૂપિણી ।
શ્રીઙ્કારાખિલદાનોત્કા સર્વબીજાઽઽત્મિકાત્મભૂઃ ॥ ૪૩॥

જમદગ્નિ શિવાઙ્કસ્થા ધર્માર્થકામમોક્ષદા ।
જમદગ્નિક્રોધહરા જમદગ્નિવચઃકરી ॥ ૪૪॥

જમદગ્નિતમોહન્ત્રી જમદગ્નિસુખૈકભૂઃ ।
જિતવીરા વીરમતા વીરભૂર્વીરસેવિતા ॥ ૪૫॥

વીરદીક્ષાકરી શૌર્યદીક્ષિતા સર્વમઙ્ગલા ।
કાત્યાયની પરીવારા કાલકાલા કલાનિધિઃ ॥ ૪૬॥

અષ્ટસિદ્ધિપ્રદા ક્રૂરા ક્રૂરગ્રહવિનાશિની ।
સાકારા ચ નિરાકારાહઙ્કારાકારણા કૃતિઃ ॥ ૪૭॥

સમ્મતા વિષમઘ્ની ચ વિષહન્ત્રી વિષાશના ।
વ્યાલાભરણસંહૃષ્ટા વ્યાલમણ્ડનમણ્ડિતા ॥ ૪૮॥

અણુરૂપા પરાણુશ્ચ સદ્રૂપા ચ કહાપરા ।
હ્રસ્વા હ્રસ્વપરા દીર્ઘા પરદીર્ઘા પરાત્પરા ॥ ૪૯॥

અદ્વયાદ્વયરૂપા ચ પ્રપઞ્ચરહિતા પૃથુઃ ।
સ્થૂલસૂક્ષ્મા નિરીહા ચ સ્નેહાઞ્જનવિવર્જિતા ॥ ૫૦॥

બ્રહ્મસૂતા મહાનિદ્રા યોગનિદ્રા હરિસ્તુતા ।
હિરણ્યગર્ભરૂપા ચ પરબ્રહ્મસ્વરૂપિણી ॥ ૫૧॥

બ્રહ્મશક્તિર્બ્રહ્મવિદ્યા વિશ્વબીજા નિરઞ્જના ।
અતુલા કર્મરૂપા ચ શ્યામલા પરિઘાયુધા ॥ ૫૨॥

નારાયણી વિષ્ણુશક્તિઃ અવાઙ્મનસગોચરા ।
ધૃતમારી પુણ્યકરી પુણ્યશક્તિરમામ્બિકા ॥ ૫૩॥

રક્તબીજવધોદ્રિક્તા રક્તચન્દનચર્ચિતા ।
સુરક્તપુષ્પાભરણા રક્તદંષ્ટ્રાભયપ્રદા ॥ ૫૪॥

તીક્ષ્ણરક્તનખારક્તા નિશુમ્ભપ્રાણકૃન્તિની ।
શુમ્ભપ્રાણનિહન્ત્રી ચ મહામૃત્યુવિનાશિની ॥ ૫૫॥

સર્વદેવમહાશક્તિર્મહાલક્ષ્મી સુરસ્તુતા ।
અષ્ટાદશભુજા જયાંશા દશદોર્દણ્ડમણ્ડિતા ॥ ૫૬॥

નિષ્કલાષ્ટભુજા ધાત્રી કલ્પાતીતા મનોહરા ।
કલ્પનારહિતાર્ચ્યાદ્યા દારિદ્ર્યવનદાહિની ॥ ૫૭॥

કૌસ્તુભા પારિજાતા ચ હાહાદિરૂપધારિણી ।
તિલોત્તમાપ્સરોરૂપા નવનાગસ્વરૂપિણી ॥ ૫૮॥

નિધિરૂપા સમાધિસ્થા ખડ્ગરૂપા શવસ્થિતા ।
મહિષાસુરદત્તાંઘ્રિઃ સિંહગા સિંહગામિની ॥ ૫૯॥

ત્રિશૂલધારિણી પ્રૌઢા બાલા મુગ્ધા સુધર્મિણી ।
શઙ્ખભૃચ્ચક્રભૃત્પાશા ગદાભૃત્પાશમણ્ડિતા ॥ ૬૦॥

કાલશક્તિઃ કૃપાસિન્ધુર્મૃગારિવરવાહના ।
ગણરાજમહાશક્તિઃ શિવશક્તિઃ શિવસ્તુતા ॥ ૬૧॥

હરિપ્રિયા શ્રાદ્ધદેવી પ્રધાના ગુહરૂપિણી ।
ગુહપ્રીતા ગણેટ્પ્રીતા કામપ્રીતા ગુહસ્થિતા ॥ ૬૨॥

સર્વાર્થદાયિની રૌદ્રી નીલાગતિરલોલુપા ।
ચામુણ્ડા ચિત્રઘણ્ટા ચ વિશ્વયોનિર્નિરન્તરા ॥ ૬૩॥

શ્રાવણી શ્રમહન્ત્રી ચ સંસારભ્રમનાશિની ।
સંસારફલસમ્પન્ના સંસારમતિરુચ્ચગા ॥ ૬૪॥

ઉચ્ચાસનસમારૂઢા વિમાનવરગામિની ।
વિમાનસ્થા વિમાનઘ્ની પાશઘ્ની કાલનાશિની ॥ ૬૫॥

કાલચક્રભ્રમભ્રાન્તા કાલચક્રપ્રવર્તિની ।
ચેતના ચાપિની ભવ્યા ભવ્યાભવ્યવિનાશિની ॥ ૬૬॥

સિંહાસનસુખાવિષ્ટા ક્ષીરસાગરકન્યકા ।
વણિક્કન્યા ક્ષેમકરી મુકુટેશાવનિસ્થિતા ॥ ૬૭॥

શ્રુતિજ્ઞા ચ પુરાણજ્ઞા સ્મૃતિજ્ઞા વેદવાદિની ।
વેદવેદાર્થતત્ત્વજ્ઞા હિઙ્ગુલા કાલશાલિની ॥ ૬૮॥

ઇતિહાસાર્થવિદ્ધર્મ્યા ધ્યેયા હન્ત્રી શિશુપ્રિયા ।

સ્તન્યદા સ્તન્યધારા ચ વનસ્થા પાર્વતીશિવા ॥ ૬૯॥

મેના મૈનાકભગિની સુરભિર્જલમુક્તડિત્ ।
સર્વબીજાન્તરસ્થાત્રી સકલાગમદેવતા ॥ ૭૦॥

સ્થલસ્થલા જલસ્થા ચ વનસ્થા વનદેવતા ।
ક્ષયહન્ત્રી નિહન્ત્રી ચ નિરાતઙ્કામરપ્રિયા ॥ ૭૧॥ (નિરાતઙ્કા હરપ્રિયા)

ત્રિકાલજ્ઞા ત્રિરૂપા ચ લીલાવિગ્રહધારિણી । (ત્રિકાલત્રા)
સમાધિઃ પુણ્યધિઃ પુણ્યા પાપાજ્ઞાનવિનાશિની ॥ ૭૨॥

દૃશ્યા દૃગ્વિષયા દૃષ્ટિઃ પાપહન્ત્રી શમસ્થિતા ।
વિરથા રથનિષ્ઠા ચ વરૂથરથસંસ્થિતા ॥ ૭૩॥

મધુકૈટભહન્ત્રી ચ સર્વદેવશરીરભૃત્ ।
ત્રિપુરા પુણ્યકીર્તિશ્ચ નૃપવશ્યપ્રદાયિની ॥ ૭૪॥ (નૃપવંશ્યપ્રદાયિની)

સાંખ્યવિદ્યા ત્રયીવિદ્યા યોગવિદ્યા રવિસ્થિતા ।
સ્થાવરા જઙ્ગમા ક્ષાન્તિર્બલિશક્તિર્બલિપ્રિયા ॥ ૭૫॥

મહિષાસુરનિર્ણાશી દૈત્યહન્ત્ર્યપરાન્તકૃત્ ।
ડમડ્ડમરુડાઙ્કારા વીરશ્રીર્જનદેવતા ॥ ૭૬॥

ઉદ્ગીથોદ્ગીથમર્યાદા ક્ષીરસાગરશાયિની ।
વીરલક્ષ્મીર્વીરકાન્તા શિવદૂતી સનાતની ॥ ૭૭॥

શક્રાદિસંસ્તુતા હૃષ્ટા ચણ્ડમુણ્ડવિનાશિની ।
પઞ્ચવક્ત્રૈકરૂપા ચ ત્રિનેત્રા બલિમોહિની ॥ ૭૮॥

ધૂમ્રલોચનનિર્ણાશાહઙ્કારોદ્ગારભાષિણી ।
એકમૂર્તિસ્ત્રિધામૂર્તિઃ ત્રિલોકાનન્દદાયિની ॥ ૭૯॥

ભવાની દશમૂર્તિશ્ચ પઞ્ચમૂર્તિર્જયન્તિકા ।
દક્ષિણા દક્ષિણામૂર્તિઃ અનેકૈકાદશાકૃતિઃ ॥ ૮૦॥

એકચક્ષુરનન્તાક્ષી વિશ્વાક્ષી વિશ્વપાલિની ।
ચતુર્વિંશતિતત્ત્વાદ્યા ચતુર્વિંશતિતત્ત્વવિત્ ॥ ૮૧॥

સોઽહં હંસાવિશેષજ્ઞા નિર્વિશેષા નિરાકૃતિઃ ।
યમઘણ્ટામૃતકલા જયઘણ્ટા જયધ્વનિઃ ॥ ૮૨॥

પાઞ્ચજન્યસ્ફુરચ્છક્તિર્હનુમચ્છક્તિરાસ્તિકા ।
શીલાતરણશક્તિશ્ચ રામશક્તિર્વિરાટ્તનુઃ ॥ ૮૩॥

લઙ્કાપ્રજ્વલના વેલા સાગરક્રમણક્રમાત્ ।
નરનારાયણપ્રીતિર્લોકનીતિરઘૌઘકૃત્ ॥ ૮૪॥

વિપાશા પાશહસ્તા ચ વિશ્વબાહુસ્ત્રિલિઙ્ગિકા ।
પ્રાચી પ્રતીચી વિદિશા દક્ષિણા દક્ષકન્યકા ॥ ૮૫॥

શિવલિઙ્ગપ્રતિષ્ઠાત્રી શિવલિઙ્ગપ્રતિષ્ઠિતા ।
અજ્ઞાનનાશિની બુદ્ધિસ્તત્ત્વવિદ્યા સુચેતના ॥ ૮૬॥

પ્રકાશા સ્વપ્રકાશા ચ દ્વયાદ્વયવર્જિતા ।
અસદ્રૂપા ચ સદ્રૂપા સદસદ્રૂપશાલિની ॥ ૮૭॥

કૈલાસનિલયા ગૌરી વૃષગા વૃષવાહના ।
સોમસૂર્યાગ્નિનયના સોમસૂર્યાગ્નિવિગ્રહા ॥ ૮૮॥

વિષમેક્ષણદુર્ધર્ષા લઙ્કાદાહકરી દિતિઃ ।
વૈકુણ્ઠવિલસન્મૂર્તિઃ વૈકુણ્ઠનિલયાનિલા ॥ ૮૯॥

નમોમૂર્તિસ્તમોમૂર્તિસ્તેજોમૂર્તિરમેયધીઃ ।
સૂર્યમૂર્તિશ્ચન્દ્રમૂર્તિઃ યજમાનશરીરિણી ॥ ૯૦॥

આપ્યમૂર્તિરિલામૂર્તિઃ નરનારાયણાકૃતિઃ ।
વિષયાજ્ઞાનભિન્ના ચ વિષયાજ્ઞાનનિર્વૃતિઃ ॥ ૯૧॥

સુખવિત્સુખિની સૌખ્યા વેદવેદાઙ્ગપારગા ।
સ્રુક્ સ્રુવા ચ વસોર્ધારા યાગશક્તિરશક્તિહૃત્ ॥ ૯૨॥

યજ્ઞકૃત્ પ્રાકૃતિર્યજ્ઞા યજ્ઞરાગવિવર્ધિની ।
યજ્ઞભોક્ત્રી યજ્ઞભાગા સૌભાગ્યવરદાયિની ॥ ૯૩॥

વ્યાપિની દશદિગ્બાહુર્દિગન્તા બલિદાયિની । (લાકિની દશદિગ્બાહુર્દિગન્તા)
કૃપા વિશ્વેશ્વરી સ્વઙ્ગા શતાક્ષી કામદેવતા ॥ ૯૪॥

કામચારપ્રિયા કામા કામાચારપરાયણા ।
ચિકિત્સા વેદવિદ્યા ચ વૈદ્યમાતામહૌષધિઃ ॥ ૯૫॥

મહૌષધિરસપ્રીતા વિકરાલા કલાતિગા ।
મેઘશક્તિર્મહાવૃષ્ટિઃ સુવૃષ્ટિઃ શિવશર્મદા ॥ ૯૬॥

રુદ્રાણી રુદ્રવદના રુદ્રપૂજ્યાન્નપૂર્ણિકા ।
અન્નદાનરસાઽન્નાધા તૃપ્તિદા ભોજનપ્રિયા ॥ ૯૭॥

કર્મપાશપ્રદા પઙ્ક્તિઃ પાકશક્તિઃ પચિક્રિયા ।
સુપક્વફલદા વાઞ્છા વાઞ્છાધિકફલપ્રદા ॥ ૯૮॥

સર્વયન્ત્રમયી પૂર્ણા સર્વભૂતાશ્રયામ્બિકા ।
બ્રાહ્મણી બ્રહ્મશક્તિશ્ચ ચરાચરવિભાવિની ॥ ૯૯॥

ચરાચરગતિર્જૈત્રી લક્ષાલક્ષેશ્વરાર્દ્ધહૃત્ ।
ગુહશક્તિર્ગણેટ્ શક્તિર્નારસિંહી સહસ્રદૃક્ ॥ ૧૦૦॥

સર્પમાલોત્તરીયા ચ સર્પ સર્વાઙ્ગભૂષણા ।
વારાહી ચ સહસ્રાક્ષી કૂર્મશક્તિઃ શુભાલયા ॥ ૧૦૧॥

શેષરૂપા શેષશક્તિઃ શેષપર્યઙ્કશાયિની ।
વરાહદંષ્ટ્રા વલિધિઃ કામધીઃ કામમોહિની ॥ ૧૦૨॥

માયિની ચિત્તસદના કામિકામપ્રવર્ધિની ।
સર્વલક્ષણસમ્પૂર્ણા સર્વલક્ષણનાશિની ॥ ૧૦૩॥

નાદરૂપા બિન્દુરૂપા કૃતકર્મફલપ્રદા ।
ધ્રુવશક્તિઃ ધ્રુવારોહા ધ્રુવાટોપા ધ્રુવાર્થદા ॥ ૧૦૪॥

ધ્રુવાકારાગ્નિહોત્રાઢ્યા ધ્રુવાચારા ધ્રુવસ્થિતિઃ ।
ધ્રુવાધ્રુવમયી ધ્રૌવ્યા ચિદ્રૂપાઽઽનન્દરૂપિણી ॥ ૧૦૫॥

હૃદ્રૂપા બગલા કૃષ્ણા નીલગ્રીવા કુધીહરા ।
પવિત્રદૃષ્ટિઃ પાવિત્ર્યકારિણી ઋષિવત્સલા ॥ ૧૦૬॥

શિશૂત્સઙ્ગધરાસઙ્ગા સઙ્ગરાગપ્રવર્ધિની । (સઙ્ગરોગપ્રવર્ધિની)
નિઃસઙ્ગા સઙ્ગબહુલા ચતુરાશ્રમવાસિની ॥ ૧૦૭॥

ચતુર્વર્ણપરિષ્વઙ્ગા ચતુર્વર્ણબહિસ્થિતા ।
નિરાશ્રયા રાગવતી રાગિમાનસસંશ્રયા ॥ ૧૦૮॥

બ્રાહ્મણી રાજદુહિતા વૈશ્યા શૂદ્રા પરાસુરા ।
ગૃહાશ્રમસમાસીના ગૃહધર્મનિરૂપિણી ॥ ૧૦૯॥

ગૃહધર્મા વિષાદઘ્ની બ્રહ્મચર્યનિષેવિણી ।

વાનપ્રસ્થાશ્રમસ્થા ચ યતિધર્મા સ્ફુરત્તનુઃ ॥ ૧૧૦॥

સંસ્થિતિઃ પ્રલયા સૃષ્ટિઃ સર્ગસ્થિત્યન્તખેલકૃત્ ।
જ્ઞાનશક્તિઃ ક્રિયાશક્તિઃ છાયાશક્તિરપૂર્વકૃત્ ॥ ૧૧૧॥

નાનાવાદવિશેષજ્ઞા નાનાવાદનિરઙ્ગતા ।
શૂન્યવાદનિરાકારા ધર્મવાદનિરૂપિણી ॥ ૧૧૨॥

નવચણ્ડી ક્રિયાહેતુઃ સઙ્કુલ્પાકલ્પનાતિગા ।
નિર્વિકલ્પા વિકલ્પાઢ્યા સઙ્કુલ્પાકલ્પભૂરુહા ॥ ૧૧૩॥

સૃષ્ટિઘ્ની ચ સ્થિતિઘ્ની ચ વિનાશઘ્ની ત્રિરૂપભૃત્ ।
અયોધ્યા દ્વારકા કાશી મથુરા કાઞ્ચ્યવન્તિકા ॥ ૧૧૪॥

વિશોકા શોકમાર્તણ્ડી પાઞ્ચાલી શોકનાશિની ।
શમનિયમશક્તિશ્ચ ધર્મશક્તિર્જયધ્વજા ॥ ૧૧૫॥

મુક્તિઃ કુણ્ડલિની ભુક્તિર્વિષદૃષ્ટિઃ સમેક્ષણા ।
કૃપેક્ષણા કૃપાર્દ્રાઙ્ગી કૃપાર્ચિતા કૃપાશ્રુતિઃ ॥ ૧૧૬॥ (કૃપાચિન્તા)

મહાપુરાદ્રિનિલયા મહાપુરકૃતસ્થિતિઃ ।
અજ્ઞાનકલ્પનાનન્તા પ્રપઞ્જકલનાતિગા ॥ ૧૧૭॥

સામ્યદૃષ્ટિઃ દેહપુષ્ટિઃ કૃતસૃષ્ટિર્હતાખિલા ।
વેણુપુણ્યપરીપાકાઽયોનિજા વહ્નિસમ્ભવા ॥ ૧૧૮॥

મહાપુરસુખાસીના ડમડ્ડમરુદર્પિતા ।
મહાપુરમહાદેવી ડમરુપ્રીતિવલ્ગિતા ॥ ૧૧૯॥

ભદ્રકાલી પિતૃશક્તિર્હ્યાલસા ભુવનેશ્વરી ।
ગાયત્રી ચ ચતુર્વક્ત્રા ત્રિપુરા વીરવન્દિતા ॥ ૧૨૦॥

યમામ્બા ત્રિગુણાઽઽનન્દા કૈવલ્યપદદાયિની ।
વડવા સદયા ભૂસ્થા શાક્તસર્ગપ્રવર્તિની ॥ ૧૨૧॥

ઇન્દ્રાદિ દેવજનની એલામ્બા કોલરૂપિણી ।
કુમ્ભદર્પહરા દોલા દોલાક્રીડનલાલસા ॥ ૧૨૨॥

શીતલા વિષ્ણુમાયા ચ ચતુર્વક્ત્રનમસ્કૃતા ।
માતઙ્ગી વિષ્ણુજનની પ્રેતાસનનિવાસિની ॥ ૧૨૩॥

ગરુત્મત્ગમનાનીલા બ્રહ્માસ્ત્રા બ્રહ્મભૂષિતા ।
સિદ્ધિઃ પાશુપતાસ્ત્રા ચ નીલેન્દીવરલોચના ॥ ૧૨૪॥

રુક્મા શઙ્કરજનની કર્મનાશા ચ શામ્ભવી ।
ત્રિગા વામનશક્તિશ્ચ હિરણ્યગર્ભભૂસુરા ॥ ૧૨૫॥

વાગ્વાદિની ચ વર્ણા ચ શઙ્કરાર્ધશરીરિણી ।
દારુણા મોહરાત્રિશ્ચ ભ્રમાદિગણરૂપિણી ॥ ૧૨૬॥

દીપિકા ક્રોડવરદા મોહિની ગરલાશના ।
કપર્દાર્ચિતસર્વાઙ્ગી કપર્દાભરણપ્રિયા ॥ ૧૨૭॥

સાવિત્રી ભૈરવીવિદ્યા પીતાપીતામ્બરપ્રભુઃ । Added
દશવક્ત્રાનવદ્યાઙ્ગી ત્રિંશલ્લોચનભૂષિતા ॥ ૧૨૮॥

દશાંઘ્રિર્દશદોર્દણ્ડા સ્ફુરદ્દંષ્ટ્રાતિભીષણા ।
કર્પૂરકાન્તિવદના નીલબાહુરનુત્તમા ॥ ૧૨૯॥

બ્રહ્મગેયા મુનિધ્યેયા હ્રીઙ્કારા કામવિગ્રહા ।
ષડ્બીજા નવબીજા ચ નવાક્ષરતનુઃ ખગા ॥ ૧૩૦॥

દશાર્ણા દ્વાદશાર્ણાઢ્યા ષોડશાર્ણાવિબીજગા ।
માલામન્ત્રમયી જય્યા સર્વબીજૈકદેવતા ॥ ૧૩૧॥

જપમાલા ચ જયદા જપવિઘ્નવિનાશિની ।
જપકર્ત્રી જપસ્તોત્રા મન્ત્રયન્ત્રફલપ્રદા ॥ ૧૩૨॥

મન્ત્રાવરણરૂપૈકા યન્ત્રાવરણદેવતા ।
પદ્મિની પદ્મપત્રાક્ષી શમી યજ્ઞાઙ્ગદેવતા ॥ ૧૩૩॥

યજ્ઞસિદ્ધિઃ સહસ્રાક્ષી સહસ્રાક્ષપદપ્રદા ।
રેણુવંશાવતારાઢ્યા મહિષાન્તકરી સમિત્ ॥ ૧૩૪॥

ઋગ્વેદા ચ યજુર્વેદા સામવેદા ત્રયીપરા ।
અભિચારપ્રિયાથર્વા પઞ્ચતન્ત્રાધિદેવતા ॥ ૧૩૫॥

અભિચારક્રિયા શાન્તિઃ શાન્તિમન્ત્રાધિદેવતા ।
અભિચારોપશમની સર્વાનન્દવિધાયિની ॥ ૧૩૬॥

અથર્વપાઠસમ્પન્ના લેખની લેખકસ્થિતા ।
ભૂમલેખ્યા વર્ણશક્તિઃ સર્વશક્તિઃ પ્રસિદ્ધિદા ॥ ૧૩૭॥

કીર્તિકામા કલાકામા કામાક્ષી સર્વમઙ્ગલા ।
શૂલેશ્વરી કુશૂલઘ્ની ચિન્તાશોકવિનાશિની ॥ ૧૩૮॥

ચિન્તાદિદેવતા ભૂતનાયકા નલકૂબરી ।
કરાલીત્યૂર્ધ્વકેશી ચ શ્રીધરી ચ વિનાયકી ॥ ૧૩૯॥

કામેશ્વરી ચ કૌબેરી પદ્માવત્યભિધાગતિઃ ।
જ્વાલામુખી ચ કૌમારી વિજયા મેઘવાહના ॥ ૧૪૦॥

મહાબલા મહોત્સાહા મહાભયનિવારિણી ।
કામિની શાઙ્કુરી કાષ્ઠા સહસ્રભુજનિગ્રહા ॥ ૧૪૧॥

પ્રભા પ્રભાકરી ભાષા સપ્તાશ્વરથસંસ્થિતા ।
અલકાપુરસંસ્થાના મૃડાની વિન્ધ્યનિશ્ચલા ॥ ૧૪૨॥

હિમાચલકૃતક્રીડા પીડાપાપનિવારિણી ।
અર્ધમાત્રાક્ષરા સન્ધ્યા ત્રિમાત્રા ભારતી ધૃતિઃ ॥ ૧૪૩॥

વેદમાતા વેદગર્ભા કૌશિકી ત્ર્યમ્બકા સ્વરા ।
અમ્બાલિકા ક્ષુધા તૃષ્ણા ધૂમ્રા રૌદ્રા દુરત્યયા ॥ ૧૪૪॥

પાનપાત્રકરા જાતિઃ શ્રદ્ધાવાર્તા ચિતાસ્થિતા ।
દુર્ગાણી રક્તચામુણ્ડાઽઽવૃતિઃ સોમાવતંસિની ॥ ૧૪૫॥

શરણ્યાઽઽર્યા દુર્ગપરા સારા જ્યોત્સ્ના મહાસ્મૃતિઃ ।
જગત્પ્રતિષ્ઠા કલ્યાણી છાયા તુષ્ટિશ્ચ તામસી ॥ ૧૪૬॥

તૃષ્ણા વાગ્ધીશ્ચ નદ્ધા ચ ગદિની ચક્રધારિણી ।
લજ્જા સહસ્રનયના મહિષાસુરમર્દિની ॥ ૧૪૭॥

ભીમા ભદ્રા ભગવતી નવદુર્ગાઽપરાજિતા ।
મેધાષ્ટાદશદોર્દણ્ડા દુર્ગા કાત્યાયની રતિઃ ॥ ૧૪૮॥

સર્વતઃ પાણિપાદોરુર્ભ્રામરી ચન્દ્રરૂપિણી ।
ઇન્દ્રાણી ચ મહામારી સર્વતોઽક્ષિશિરોમુખા ॥ ૧૪૯॥

ક્ષોભિણી મોહિની ચૈવે સ્તમ્ભિની જૃમ્ભિણી તથા ।
રથિની ધ્વજિની સેના સર્વમન્ત્રમયી મહી ॥ ૧૫૦॥

જ્ઞાનમુદ્રા મહમુદ્રા જપમુદ્રા મહોત્સવા ।

જટાજૂટધરા મુક્તા સૂક્ષ્મશાન્તિર્વિભીષણા ॥ ૧૫૧
સપ્તાબ્ધિસંશ્રયા સત્તા સપ્તદ્વીપાબ્ધિમેખલા ।
સૂર્યદીપ્તિર્વજ્રપંક્તિઃ પાનોન્મત્તા ચ પિઙ્ગલા ॥ ૧૫૨॥

સર્વજ્ઞા વિશ્વમાતા ચ ભક્તાનુગ્રહકારિણી ।
વિશ્વપ્રિયા પ્રાણશક્તિરનન્તગુણનામધીઃ ॥ ૧૫૩॥

સર્વકલ્યાણનિલયા શારદા ત્ર્યમ્બિકા સુધા ॥ ૧૫૪॥

ફલશ્રુતિઃ ।
શ્રી શઙ્કર ઉવાચ –
દિવ્યં નામસહસ્રં તે રેણુકાયા મયેરિતમ્ ।
સર્વકામસમૃદ્ધ્યર્થમનેન ભજ ષણ્મુખ ॥ ૧૫૫॥ સમૃદ્ધિ અર્થં અનેન

ભુક્તિદો મુક્તિશ્ચાપિ ભજતાં કલ્પપાદપઃ ।
જયપ્રદો વિશેષેણ નાનેન સદૃશો મનુઃ ॥ ૧૫૬॥

પુરશ્ચરણમુદ્દિષ્ટં સહસ્રં નવકં શુભમ્ ।
વિજયાર્થં વિશેષેણ પ્રયોગં સાધયેત્તતઃ ॥ ૧૫૭॥

હસ્તયોર્ભાજનં કૃત્વા પ્રસાદં યાચયેન્મુહુઃ ।
લબ્ધપ્રસાદો ભક્તેભ્યશ્ચિન્તયેધૃદિ રેણુકામ્ ॥ ૧૫૮॥ ચિન્તયેત્ હૃદિ

ભક્તિતો યોગિનીવૃન્દં પૂજયેત્તોષયેન્મુદા ।
તત્પાત્રં પૂરયેદન્નૈઃ પૂજયિત્વોપચારકૈઃ ॥ ૧૫૯॥

શ્ૃઙ્ગિનાદં સમાકર્ણ્ય પ્રાર્થયેદુદયાશિષમ્ ।
સર્વેભ્યશ્ચાશિષો લબ્ધ્વા ભુઞ્જીત સહબાન્ધવૈઃ ॥ ૧૬૦॥

નાનાજાતિભવાન્ભક્તાન્ પ્રીયતાં રેણુકેતિ ચ ।
ઉત્સર્ગાદિપ્રસાદેન તોષયેચ્ચ મુહુર્મુહુઃ ॥ ૧૬૧॥

દીપકાડમરુધ્વાનૈરુદયોદ્દામકીર્તનૈઃ ।
ગોદોહસમયે કુર્યાદ્ગોદોહજમહોત્સવમ્ ॥ ૧૬૨॥

જગદમ્બામયં પશ્યન્ સકલં દૃષ્ટિગોચરમ્ ।
દીપિકાડમરૂત્સાહં ભક્તૈઃ સહ નિશાં નયેત્ ॥ ૧૬૩॥

અવર્ષણે ધરાકમ્પે સંક્ષોભે સાગરસ્ય ચ ।
આવર્તનસહસ્રેણ નિશ્ચિતે જાયતે શુભમ્ ॥ ૧૬૪॥

દુષ્ટોત્પાતે મહાઘોરે સઙ્કટે દુરતિક્રમે ।
અયુતાવર્તનાન્નૂનમસાધ્યમપિ સાધયેત્ ॥ ૧૬૫॥

નિશીથે વા પ્રદોષે વા જગદમ્બાલયે શુચિઃ ।
નવરાત્રં જપેદ્યસ્તુ પ્રત્યહં નવવારકમ્ ॥ ૧૬૬॥

નામભિઃ પૂજનં હોમં પ્રત્યયં કુરુતે વ્રતી ।
પ્રસન્નાસ્મૈ મહામાયા પ્રત્યક્ષં ભવતિ ધ્રુવમ્ ॥ ૧૬૭॥

ત્રિવારં નિયતં જપ્ત્વા ષણ્માસં વ્રતવાન્ શુચિઃ ।
દારિદ્ર્યાર્ણવમુત્તીર્ય વિપુલાં શ્રિયમાપ્નુયાત્ ॥ ૧૬૮॥

વિશેષસાધનં કુર્યાત્પુરશ્ચર્યાં પુનઃ સુધીઃ ।
સાધયેત્સકલાન્કામાન્ સત્વરં નાત્ર સંશયઃ ॥ ૧૬૯॥

પુષ્પાજ્યપાયસતિલૈર્હરિદ્રામધુચન્દનૈઃ ।
નાનાપરિમલદ્રવ્યૈર્ભક્તિયુક્તો યજેન્મુદા ॥ ૧૭૦॥

ઇદં પઠતિ યો ભક્ત્યા શૃણુયાદ્વાપિ નિત્યશઃ ।
નિર્વિઘ્નં લભતેઽભીષ્ટં જીવેચ્ચ શરદાં શતમ્ ॥ ૧૭૧॥

શુક્લપક્ષેઽથવા કૃષ્ણે ભૂતાધઃ ષષ્ઠિકાદિનાત્ ।
સાધકઃ સાઙ્ગવિધિના સાધયેત્સ્તોત્રમન્ત્રવિત્ ॥ ૧૭૨॥

ઇષે શુક્લનવમ્યન્તમારભ્ય પ્રતિપત્તિથિમ્ ।
નવરાત્રોક્તવિધિના કલશં પૂજયેન્મુદા ॥ ૧૭૩॥

સઙ્કટે સત્વરે કૃત્યે વિધિનાવર્તયેત્ સ્થિતિમ્ ।
પ્રાપ્નોતિ વાઞ્છિતં સદ્યઃ સર્વવિઘ્નવિનાશકૃત્ ॥ ૧૭૪॥

ઘૃતદ્વીપદ્વયં કૃત્વા દક્ષિણોત્તરભાગયોઃ ।
નાનાભોગોપચારૈશ્ચ તોષયેજ્જગદમ્બિકામ્ ॥ ૧૭૫॥

કુઙ્કુમાગરુકસ્તૂરીચન્દનાભિરર્ચયેત્ ।
કુમારીં પૂજયેત્ભક્ત્યા બ્રાહ્મણાંશ્ચ સુવાસિનીમ્ ॥ ૧૭૬॥

ષડ્રસૈઃ સ્વાદુ પક્વાન્નૈર્ભોજયેચ્ચ ચતુર્વિધૈઃ ।
શક્તિતો દક્ષિણાં દદ્યાદ્વાસોધાન્યં ગવાદિકમ્ ॥ ૧૭૭॥

વિત્તશાઠ્યં ન કુર્વીત સર્વકાર્યસમૃદ્ધયે ।
પ્રણમેત્ પ્રણમેદ્ભક્ત્યા પ્રોચ્યતામુદયોસ્ત્વતિઃ ॥ ૧૭૮॥

ભૂષિતો મઙ્ગલસ્નાનૈઃ સ્વાલેપ્યામ્બરમાલ્યવાન્ ।
વિભૂષ્યાઙ્ગં કપર્દૈશ્ચ પ્રજ્વાલ્ય ધૃતદીપિકામ્ ॥ ૧૭૯ ॥

યદ્યદારભ્યતે કાર્યં તદાદૌ ચ સમાપને ।
સમ્પૂજ્યામ્બાં કુમારીંશ્ચ પૂજયેજ્જપપૂર્વકમ્ ॥ ૧૮૦ ॥

ભૂતાષ્ટમ્યાં નવમ્યાં ચ ભૌમે ચ નિયતઃ પઠેત્ ।
સર્વાન્ કામાનવાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૧૮૧ ॥

ભૂતા રક્ષઃ પિશાચાદ્યા વૈરિણો દસ્યવોઽપિ ચ ।
પઠ્યતેઽનુદિનં યત્ર તદ્ગૃહં ન વિશન્તિ ચ ॥ ૧૮૨ ॥

અબ્ધિસઞ્ચરણે પોતે લઙ્ઘને ગિરિરોહણે ।
ચિત્તક્ષોભે પ્રસાદે ચ વિષાદે વા પઠેદિદમ્ ॥ ૧૮૩ ॥

દુઃસ્વપ્નદર્શને માર્ગે વિદ્રૂરે કલહાગમે ।
યાત્રાકાલે પઠેદેતત્ સર્વમાઙ્ગલિકાગમે ॥ ૧૮૪ ॥

નિષ્કામો વા સકામો વા પુરુષાર્થપ્રદં યતઃ ।
ત્રૈવર્ણિકઃ પઠેદેતદિતરઃ પાઠયેત્ સદા ॥ ૧૮૫ ॥

સૌભાગ્યં લભતે નારી કન્યા સર્વોત્તમં વરમ્ ।
મૃતવત્સા લભેત્પુણ્યમાયુષ્મત્સન્તતિં શુભામ્ ॥ ૧૮૬ ॥

અસૂતિર્લભતે સૂતિં સુસૂતિં કષ્ટસૂતિકા ।
ઉદાસીના લભેત્પ્રીતિં પતિબાલપ્રિયઙ્કરી ॥ ૧૮૭ ॥

ન વૈધવ્યમવાપ્નોતિ ન સપત્નીં લભેત્ક્વચિત્ ।
સુરૂપા સુભગા ધન્યા વિરહં નાપ્નુયાત્ક્વચિત્ ॥ ૧૮૮ ॥

ચ્યવદ્ગર્ભવતી યા ચ દૃઢગર્ભવતી ભવેત્ ।
વિત્તાપત્યપરીવારા પતિમણ્ડિતવિગ્રહા ॥ ૧૮૯ ॥

સહસ્રનામકં સ્તોત્રં પઠ્યતે યત્ર વેશ્મનિ ।
ગ્રહાઃ કાલગ્રહાઃ પીડાં નૈવ કુર્વન્તિ કર્હિચિત્ ॥ ૧૯૦ ॥

યદ્ગૃહે પૂજિતં હ્યેતત્ પુસ્તકં વા સુભક્તિતઃ ।
શક્તિતો હવનં કુર્યાદ્ વિઘ્નસ્તત્ર વિનશ્યતિ ॥ ૧૯૧ ॥

ગર્ભિણી સ્રાવયેન્નિત્યં ગર્ભદોષાન્નિવર્તતે ।

સૂતિકાયતને પ્રોક્તં સૂતિકાબાલસૌખ્યદમ્ ॥ ૧૯૨॥

સર્વં મન્ત્રાધિકમિદં ભક્ત્યા યઃ સર્વદા પઠેત્ ।
શ્રાવયેત્ પાઠયેદ્વાપિ સર્વત્ર લભતે જયમ્ ॥ ૧૯૩॥

પુસ્તકાનિ પ્રદેયાનિ વિપ્રેભ્યો નવભક્તિતઃ ।
સોપચારાણિ વિધિના રેણુકા તુષ્ટિહેતવે ॥ ૧૯૪॥

પુત્રકામી શુભાન્ પુત્રાન્ ધનાર્થી વિપુલં ધનમ્ ।
કન્યાર્થી લભતે કન્યાં કુલશીલાદિમણ્ડિતામ્ ॥ ૧૯૫॥

વિદ્યાકામો લભેદ્વિદ્યાં કવિત્વં કવિતાપ્રિયઃ ।
પ્રજ્ઞાતિશયમાસાદ્ય સમર્થો ગ્રન્થધારણે ॥ ૧૯૬॥

મુચ્યતે નિગડાબદ્ધઃ સ્ખલદ્ધીઃ સ્પષ્ટવાગ્ભવેત્ ।
કામુકઃ કામમાપ્નોતિ ભૂપાલં વશમાનયેત્ ॥ ૧૯૭॥

કુષ્ઠાપસ્મારરહિતો જ્વરરોગવિવર્જિતઃ ।
રોગી રોગવિનિર્મુક્તઃ શત્રુસઙ્ઘાજ્જયો ભવેત્ ॥ ૧૯૮॥

શીતલો જાયતે વહ્નિર્વિષં સ્યાદમૃતોપમમ્ ।
શસ્ત્રાણ્યુત્પલતાં યાન્તિ પઠનાદસ્ય ભક્તિતઃ ॥ ૧૯૯॥

અન્ધો દૃષ્ટિમવાપ્નોતિ બધિરઃ શ્રુતિમાન્ ભવેત્ ।
મૂકો વાચાલતામેતિ રેણુકાયાઃ પ્રસાદતઃ ॥ ૨૦૦॥

રેણુકેત્યેકનામેદં ધર્માર્થકામમોક્ષદમ્ ।
ફલં નામસહસ્રસ્ય સમર્થો વક્તુમસ્તિ કઃ ॥ ૨૦૧॥

રેણુકાસ્મરણાન્નૂનં વિષં નાક્રમેત્ તનૌ ।
સર્વપીડોપશાન્તિશ્ચ સકલાર્થસુખોદયઃ ॥ ૨૦૨॥

નારાયણઃ શ્રિયા યુક્તઃ સાવિત્રીસહિતો વિધિઃ ।
અહં ભવાનીસહિતો રેણુકાર્ચનતોઽર્ચિતા ॥ ૨૦૩॥

સર્વં યજ્ઞફલં તસ્ય પારાયણફલં તથા ।
સાઙ્ગયોગફલં તસ્ય રેણુકા યેન પૂજિતા ॥ ૨૦૪॥

ઉચ્યતે બાહુમુદ્ધૃત્ય બહુનોક્તેન ષણ્મુખ ।
સેવ્યતે રેણુકા યૈસ્તે સેવ્યન્તે ત્રિદશૈરપિ ॥ ૨૦૫॥

ઇતિ શ્રી પદ્મપુરાણે માયોપાખ્યાને રેણુકાપ્રસ્તાવે
રેણુકાપ્રકૃતિભાવે શઙ્કરષણ્મુખસંવાદે
શઙ્કરપ્રોક્તં રેણુકાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Singanallur Ganesan singanallur at gmail.com

*Shri Renuka Sahasranama Stotram*
pdf was typeset on May 13, 2022

Please send corrections to *sanskrit@cheerful.com*